# MT - 172

**2014 .... .... 1200** **Seat No.** | | | | | | | |

MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM II - PAPER - I

**Time : 3 Hours** **(Pages 6)** **Max. Marks : 80**

**Q.I. (A) Translate *any three* of the following passages into English : 15**

(i) रवीन्द्रनाथ गान्धीमहोदयादीनां प्रतिमानिर्माणे रतस्यास्य कौशल्यं ज्ञात्वा टाटाकम्पनीप्रमुखेण स प्रगतशिक्षणार्थं लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति प्रेषितः । तत्रापि प्रावीण्यं संप्राप्य स इटली-फ्रान्स-स्वित्झर्लण्डादिदेशस्थान् शिल्पकारान् मिलित्वा, तेषां च कलाकृतीनामध्ययनं कृत्वा स्वदेशं प्रत्यागतः ।

(ii) विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति । जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते । श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते। अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति । सैबेरियादेशात् आगच्छन्तः अत्र शीतर्तौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि ।

(iii) यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः । निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन ।

(iv) आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत् । तदा मात्रोक्तं ''वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्तेः पूजा न कृता तथापि बालिकायाः साहाय्यं कृत्वा, बालिकारूपशक्तिदेवतायाः एव पूजनं कृतम् ।'' धन्या सा माता धन्यश्च बालनरेन्द्रः ।

(v) कृष्णाङ्गाराः, खनितैलं, नैसर्गिकवायुश्चेति पारम्परिकाणि । दशलक्षाधिकवर्षेभ्यः पूर्वं निर्जीवीभूताः प्राण्यंशाः सस्यांशाश्च मृत्तिकायाः महाशिलानां च बहुभारेणान्तः सम्पीडनाद् द्रववायुरूपं प्राप्नुवन्ति । तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते ।

**Q.I. (B) Translate *any two* groups of verses into English : 8**

**Group I**

(i) आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विजः ।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे ।।

(ii) तत्राश्रितोग्रतपसस्तस्य तं वीक्ष्य विस्मितः ।
वारयिष्यन् द्विजच्छद्मा शक्रो निकटमाययौ ॥

**Group II**

(i) तन्मूलं गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।
तत्सौभाग्यं पुंसां यदेतदप्रार्थनं नाम ॥

(ii) तत्सूनुः क्षितिपालमौलिमुकुटव्याघृष्टपादाम्बुजः ।
सत्कीर्तिर्विलसत् प्रतापवशगामित्रः क्षितीशेश्वरः ॥

**Group III**

(i) यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ॥

(ii) नृपाणां च नराणां च केवलं तुल्यमूर्तिता ।
आधिक्यं तु क्षमा धैर्यमाज्ञादानं पराक्रमः ॥

**Group IV**

(i) अणुशास्त्रे वा विज्ञाने वा
सङ्गणकीये पोखरणे वा
ऐन्द्रजालिकैराधुनिकैर्यत् प्रावीण्यं प्राप्तम्
ध्वजमध्ये तद् यशो धवलतामाप्त्वा सङ्कलितम् ।
ध्वजमध्यस्थो धवलिमा च मामुत्साहयतेऽयम्
भावोत्कटता मुखरयते मां 'जयतु च विज्ञानम्' ॥

**Q.II. (A) Answer *any two* questions in English from group I and II each :** **8**

**Group I**

(i) How did लेरसिया change his look ?
(ii) What is रस ? How did भरतमुनि explain it ?
(iii) What did monks do while staying in the सङ्घ ?

**Group II**

(i) Explain the importance of a friend.

(ii) According to the poem नमामि राष्ट्रध्वजम् from what has the national flag got its green colour ?

(iii) What trick did इन्द्र use to prohibit तपोदत्त from taking impulsive decision?

**Q.II. (B) Complete *any two* verses of the following :** **4**

(i) ज्ञानेन ............... महानुभावाः ॥

(ii) दुःखिताः ............... सुकृतपादपाः ॥

(iii) सदा ............... सुकृतिनः ॥

(iv) गृह्णन्तु ............... सिन्धुः ॥

**Q.II. (C) Complete *any one* verse based on a metre :** **2**

(i) गीति (ii) उपेन्द्रवज्रा

**Q.III. Write 5 sentences in Sanskrit on *any one* topic given below:** **5**

(i) व्यायामस्य महत्त्वम् । (ii) सङ्गणकः । (iii) रक्षाबन्धनम् ।

**OR**

**Complete the story.**

(i) न्यायाधीशस्तस्य ______________ ज्ञात्वा क्रुद्धोऽभवत् । धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां ______________ दुर्लभाः एव । न्यायाधीशः अवदत् लक्षरूप्यकाणां दातारः कदाचिदन्येऽपि भवेयुः परं लक्षरूप्यकाणां ______________ मत्सदृशाः अन्ये विरला एव । अतः कृपया गच्छतु । न्यायस्थानं ______________ मा कुरु । लज्जितः धनिकः धनस्यूतं ______________ ततः निर्गतः ।

( मन्तव्यं, निराकर्तारः, दातारः, गृहीत्वा, मलिनं )

**Q.IV. (A) Rewrite the following sentences according to the order :** **5**

(i) कस्यश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत ।

(ii) ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् ।

(iii) तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत ।

(iv) कदाचित् सः स्वसहाकारिभिः सह दूरवर्तिनं कंचन ग्रामं गतः ।

(v) तत्पूर्वं कदापि स तत्र न गतवान् ।

**OR**

**(B) Answer *any five* question in Sanskrit :**

(i) वैद्यस्य पत्न्या किं परिवेषितम् ?

(ii) तपोदत्तेन शैशवे किं न कृतम् ?

(iii) कस्माद् नास्त्यपरः सुहृद् भवभृताम् ?

(iv) कोलकत्तानगरे प्रदर्शनार्थं निर्मितस्य शिल्पस्य नाम किम् ?

(v) धनेशाः कुत्र वसन्ति ?

(vi) कः साक्षरोऽपि निरक्षरः आधुनिककाले ?

(vii) किम् उक्त्वा कवयित्री योद्धारं नमति ?

(viii) मुबारखेन्द्रः कस्य पुत्रः ?

**Q.V. (A) Translate *any one* unseen passage / dialogue into English : 5**

(i) मुखोद्गतं क्रियमाणं पठनं नाम मण्डूकानां रटनम् इति उक्त्वा केचिद् जनाः उपहसन्ति । किन्तु शैशवे मुखोद्गतं कृतं पठनं वार्धक्ये अपि साहाय्यकारी भवति एषः अनुभवः । यः भृशं मुखोद्गतं करोति तस्य पुरतः विविधानि शास्त्राणि अञ्जलिं बद्ध्वा तिष्ठन्ति । प्रत्युत यः न करोति स स्वल्पकार्याणां कृते विविधान् कोशान् पश्यति । संदर्भस्थलानि विचिनोति अथवा कमपि विद्वांसं पृच्छति । एषः कालापव्ययः । अथवा अनिश्चितं ज्ञानम् अवलम्ब्य स किमपि वदति यद् न विश्वासार्हम् । मौक्तिकम् अपेक्षमाणः मनुजः सागरतलमेव गन्तुमर्हति ।

(ii) महान्तं वैज्ञानिकं सर-ऐझॅक-न्यूटनमहाशयं तस्य मार्जरशावकः विज्ञानस्य सर्वोत्तमं पाठं पाठितवान् । अभ्यासिकायां न्यूटनमहाशयः यदा पठने मग्नः तदा एव तस्य प्रिया मार्जारी अभ्यासिकायां प्रवेष्टुमिच्छति स्म । अतः न्यूटनमहाशयः अभ्यासिकाद्वारे छिद्रद्वयं कृतवान् । महच्छिद्रं मार्जार्याः कृते लघुच्छिद्रं शावकस्य कृते । परन्तु यदा मार्जारी महाच्छिद्रतः अभ्यासिकायां प्रविष्टा, शावकः अपि तामेव अन्वसरत् । महत्तरात् छिद्राद् अपि लघुतरः प्राणी प्रवेष्टुं शक्नोति इति विज्ञानस्य सामान्यं तत्त्वं व्यस्मरत् न्यूटनमहाशयः । एतदपि क्वचित् भवति ।

(iii) प्रियंवदा – हा धिक् हा धिक् ! अप्रियमेव संवृत्तम् । कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला । (पुरोऽवलोक्य) एष दुर्वासाः सुलभकोपो महर्षिः । तथा शप्त्वा दुर्वारया गत्या प्रतिनिवृत्तः ।

अनसूया – कोऽन्यो हुतवहाद्दग्धुं प्रभवति । गच्छ पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि ।

प्रियंवदा – तथा । (इति निष्क्रान्ता ।)

**Q.V. (B) Translate *any one* group of verses into English : 4**

**Group I**

(i) न हि प्रमादात्परमस्ति किञ्चिद्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्तात् त्यजन्त्यनर्थाश्च समाविशन्ति ।।

(ii) मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहङ्गैः कुसुमानि भृङ्गैः ।
नास्त्येव तेच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात् ।।

**Group II**

(i) उद्धतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
ते वै यथोक्तवक्तारो न वध्याः पृथिवीभुजा ।।

(ii) अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च सङ्गमार्थम् ।
आपत्प्रपन्नस्य मोक्षणार्थं यन्मन्त्र्यतेऽसौ परमो हि मन्त्रः ।।

**Q.VI. Answer in English : (*Any two*)** **4**

(i) How has sage मार्कंडेय described the significance of colours ?

(ii) According to मार्कंडेय, how should be the paintings of different types of people ?

(iii) Why did डॉ. बाबासाहेब आंबेडकर want संस्कृत to be the national language ?

(iv) How did डॉ. बाबासाहेब आंबेडकर display his proficiency in संस्कृत ?

**Q.VII. Make *any five* sentences in Sanskrit by using indeclinables / governing cases :** **5**

| | | |
|---|---|---|
| (i) साकम् | (ii) कृते | (iii) अभितः |
| (iv) बहिः | (v) दा - यच्छ् (1 PP) | (vi) स्पृह् (10 UP) |
| (vii) रुच् (1 AP) | (viii) प्रति | |

**OR**

**Translate *any five* sentences in Sanskrit :**

(i) Peacock-feather looks beautiful on the head of Lord Krishna.

(ii) On 5th sep. teacher's day is celebrated.

(iii) Now railway reservation has become easy.

(iv) The good people never give up the just path.

(v) Army chief arranges the array.

(vi) Let your fame ever increase.

(vii) The tree which is cut grows again.

(viii) Tell your mobile number.

**Q.VIII. Solve the following questions :** **15**

**(A) Recognize *any three* of the following forms :**

| | | |
|---|---|---|
| (i) करिष्ये | (ii) नियुक्ता | (iii) पप्रच्छ |
| (iv) चेतसः | (v) उषित्वा | |

**(B) Dissolve and name the compounds : (*Any three*)**

(i) सुखदुःखयोः (ii) पादपाः (iii) प्रसन्नचित्तः

(iv) सत्वरम् (v) महाक्रान्तिः

**(C) Dissolve sandhi as following : (*Any three*)**

(i) स साक्षरोऽपि (ii) तच्छ्रुत्वा (iii) स्थितेयम्

(iv) वंशोऽसौ (v) बहुष्वमर्त्यैरद्यापि

**(D) Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :**

(i) ............ नाम रसाः ? ( काः / के / कानि )

(ii) किं कृतं ............ । ( तुभ्यम् / त्वया / त्वम् )

(iii) कारगिलमखे .......... तैः हुताः च सोल्लासम् । ( स्वप्राणैः / स्वप्राणाः / स्वप्राणः )

(iv) नरेन्द्रस्य ............ मूर्तिः पतिता । ( हस्तेन / हस्तात् / हस्तस्य )

(v) धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमः ........... । ( अहम् / आवाम् / वयम् )

**(E) Do as directed : (*Any three*)**

(i) तेन धनिकेन सत्वरं सेवकः प्रेषितः । (Change the voice)

(ii) नष्टे कारणे कुतः कार्योत्पत्तिः ? (Use 'यदि ............. तर्हि ..........')

(iii) लेरसिया रात्रिमयापयत् । (Remove cuasal)

(iv) अध्ययनं कृत्वा सः स्वदेशं प्रत्यागतः ।

(Use imperfect past tense form of the root 'प्रति + आ + गम्' instead of 'प्रत्यागतः')

(v) तं वीक्ष्य शक्रः निकटमागच्छत् । (Remove gerund)

***Best Of Luck***

# MT - 172

**2014 .... .... 1200**

MT - 172 - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM II - PAPER - I

**Time : 3 Hours** **Preliminary Model Answer Paper** **Max. Marks : 80**

| | | |
|---|---|---|
| **A.I.** | **(A) Translate *any three* of the following passages into English :** | |
| (i) | Knowing the talent of this one, who was busy (engrossed in) making images of the Respected रवीन्द्रनाथ, गान्धी, etc., he was sent to the Royal Academy situated in London by the head of Tata Company. Having accomplished distinction even there, having met sculptors from Italy, France, Switzerland, etc. and having studied their artifacts, he returned to the motherland. | **5** |
| (ii) | Different varieties of cranes looking out for preys in grasses are visible from a far. Many species of birds are seen floating in the waters. A special variety of White Spoonbill appears unique. Other birds also come here from other countries for staying in winter. It is sorry and shameful that cranes that come from Siberia and stay here during winter have become extinct now. | **5** |
| (iii) | Just as there was a wish-granting tree in the ancient times, likewise, the internet is a knowledge-granting tree in the modern times. Whatever information the mind desires, it is fulfilled by this (internet) within a moment itself. The knowledge of various sciences and arts, world news, information about various organizations and departments, thousands of books, useful information for travel and reservation of seats, seeing and conversation with far-off people, general knowledge, etc. is available due to this technology. | **5** |
| (iv) | Considering himself an offender, he narrated everything to his mother. At that time, the mother said, "child नरेन्द्र, stop deploring. Even though you did not worship the idol, yet you indeed worshipped the Goddess of power in the form of the girl." Blessed were the mother and young नरेन्द्र. | **5** |

| | | |
|---|---|---|
| (v) | Coal (Charcoal), crude oil and natural gas are the conventional ones. Fossils of animals and plants, that died more than million years ago, attain the form of liquid gas due to the force and inward-pressure of the huge force of soil and huge rocks. This fuel in the liquid form is called crude oil. | **5** |
| **A.I.** | **(B) Translate *any two* groups of verses into English :**<br>**Group I** | |
| (i) | There was a certain brahmin named तपोदत्त in Paithan (previously called प्रतिष्ठान). Even though he was troubled (pestered) by his father (to attend school) he did not take education (study) in childhood. | **2** |
| (ii) | There, while he resorted to severe penance, Lord इन्द्र, who was amazed looking at him, came near disguised as a Brahmin to prevent / resist him. | **2** |
| | **Group II** | |
| (i) | That which is not begged from others is the root cause of greatness, joy, success, strength and fortune of men.<br>**Explanation :** That is real greatness, success, strength and joy which is acquired with one's own hard work, not that which is obtained by begging from others. When we beg from others we lose our self respect. | **2** |
| (ii) | His son, Adil Shah (II) was the Lord of the earth, upon whose lotus-like feet rubbed the crowns of surrendering kings, who shone with good fame and who controlled his enemies with valour. | **2** |
| | **Group III** | |
| (i) | Just as sunshine and shade are interdependent, likewise, the subject and the object are mutually connected.<br>**Explanation** : There is a cause for every effect. | **2** |
| (ii) | Kings and common men only have a similar form /appearance, however forgiveness, courage, giving orders and bravery are in abundance / excess (in a king). | **2** |

| | | |
|---|---|---|
| | **Group IV** | |
| (i) | The proficiency/skill acquired in nuclear science or technology or computers or at पोखरण by the modern magicians (scientists) has accumulated on the flag by attaining white colour. This whiteness in the middle of the flag enthuses/energizes me and the intense emotion makes me say "जय विज्ञान" (may science triumph). | **4** |
| **A.II.** | **(A) Answer *any two* questions in English from group I and II each :** | |
| | **Group I** | |
| (i) | Once लेरसिया went to certain remote village with his colleagues. Before entering the village, he hit himself by strokes of whip very badly. Due to that, marks of strokes appeared on his body. He also applied the pulp of a certain medicine due to which his body started swelling. Being defaced he looked like a poor and sick person. He was looking more pitiable as he applied the clay on his body. | **2** |
| (ii) | रस is poetic sentiment used in play. To explain the रस theory, sage भरत links it to six different tastes in the food. As there are six tastes like sour, bitter, astringent, sweet, salty, pungent by which food becomes delicious, similarly any art form like drama appeals the audience if it is presented through different emotions. These nine different emotions are manifested through poetic sentiments called रस. | **2** |
| (iii) | Near the city of अवन्ती, there was a penance grove. There was a famous Buddhist monastery there. Many monks lived there and practiced penance. They followed the precepts of Lord सुगत बुद्ध and lived the disciplined life of hermits. They considered the affectionate Lord as their father. Hence, whenever they faced any problem or trouble, they would approach the Lord for a solution. | **2** |
| | **Group II** | |
| (i) | The poet says, a real friend who gives us love is not only like collyrium to the eyes, but also pleases the mind with his presence. | **2** |

| | | |
|---|---|---|
| | Moreover, he stands by us through thick and thin. He never abandons us however bad may our situation be. But some people pretend to be our friends during our prosperity, just because they wish to gain some benefit from us. Such friends aren't real friends. Hence, the poet says, calamity is the real test of a friend - व्यसने मित्रपरीक्षा भवति । | |
| (ii) | The earth which has seeds of grain in her womb is sprinkled by the sweat and blood of the farmers. This earth bears the fruits due to hard work of farmers. It was due to this that the green revolution took place in India. Our nation became self-sufficient in grain production. This has appeared in the green colour of the flag. This green prosperity was possible due to farmers. Therefore, poetess salutes them by saying 'जय किसान'. | **2** |
| (iii) | तपोदत्त, a young brahmin boy, did not study during childhood and grew up to be criticized for his illiteracy. He then decided to perform severe penance on the banks of river गङ्गा for achieving knowledge. Lord इन्द्र was amazed at this impulsive decision and having decided to discourage तपोदत्त from penance, he arrived there in the disguise of a brahmin. While तपोदत्त was looking at him, he started tirelessly casting sand from the banks of the river into the water. | **2** |
| **A.II.** | **(B) Complete *any two* verses of the following :** | |
| (i) | ज्ञानेन **पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।**<br>**ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति** महानुभावाः ॥ | **2** |
| (ii) | दुःखिताः **परदुःखेषु निर्लोभा दुर्लभेषु च ।**<br>**विपक्षेषु क्षमावन्तः सन्तः** सुकृतपादपाः ॥ | **2** |
| (iii) | सदा **सद्ग्रन्थानां श्रवणमनने ये विदधते ।**<br>**नयन्ते वा कालं कविकृतविनोदैः प्रमुदिताः ।**<br>**भ्रमं दूरीकुर्वन्ति च सदुपदेशेन कुधियां**<br>**स्वयं निर्भ्रान्तत्वात् प्रभुपदरतास्ते** सुकृतिनः ॥ | **2** |

| | | |
|---|---|---|
| (iv) | गृह्णन्तु **सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणाम् ।**<br>**रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव** सिन्धुः ।। | **2** |
| **A.II.** | **(C) Complete *any one* verse based on a metre :** | |
| (i) | गीति - **वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।**<br>**न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ।।** | **2** |
| (ii) | उपेन्द्रवज्रा - **अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः ।**<br>**यथाऽऽस्यमध्ये पतितोऽपि राहोः कलानिधिः पुण्यचयं ददाति ।।** | **2** |
| **A.III.** | **(A) Write 5 sentences in Sanskrit on *any one* topic given below:** | |
| (i) | **व्यायामस्य महत्त्वम् ।**<br>शरीरमाद्यं खलु धर्मसाधनम् । शरीरसम्पदे व्यायामः आवश्यकः । व्यायामेन शरीरं लघु भवति । उत्थानयोग्यं चपलं च भवति । जठराग्निः प्रदीप्तः भवति । दीर्घकालपर्यन्तं शरीरं कार्यक्षमं वर्तते । मनुजः बलसम्पन्नः प्रसन्नचित्तः च भवति । व्यायामेन शरीरं व्याधिग्रस्तं न भवति तथा वार्धक्यं दूरं तिष्ठति । | **5** |
| (ii) | **सङ्गणकः ।**<br>एकविंशतितमं शतकं सङ्गणकस्य नाम्ना एव प्रसिद्धं भवति । विविधाः गणनक्रियाः सङ्गणकः सलीलं करोति । केवलं सङ्गणनक्रियायामेव सङ्गणकस्य रुचिः भवति एतद् न सत्यम्। किन्तु सः काव्यं करोति, गीतानि गायति, चित्राणि च आलिखति । सङ्गणकस्य विशिष्टा भाषा भवति । संस्कृतभाषा व्याकरणशास्त्रेण सुबद्धा वर्तते । अतः संस्कृतभाषा सङ्गणकाय उपयुक्ता इति मतं प्रसिद्धम् । | **5** |
| (iii) | **रक्षाबन्धनम् ।**<br>श्रावणपौर्णिमायां रक्षाबन्धनमहोत्सवः सम्पद्यते । एतस्मिन् दिने भगिनी बन्धोः करे रक्षासूत्रं बध्नाति । बन्धुः भगिन्याः रक्षणकर्ता अस्ति । एतत् स्नेहसूत्रमयं बन्धनं दृढं भवति रक्षासूत्रबन्धनेन । राज्ञी पद्मावती मुगलसम्राजं हुमायुनं रक्षाबन्धनदिने रक्षासूत्रं प्रेषितवती । तेन प्रेरितः सः स्वसैन्यं रजपूतानां साहाय्यार्थं प्रेषितवान् । एषा कथा तु प्रसिद्धा । 'सबलाः दुर्बलान् रक्षन्तु, सर्वेषां मङ्गलं भवतु' इति भारतीयाः एतेन रक्षाबन्धनेन सूचयन्ति । एषः एव एतस्य उत्सवस्य विशेषः । | **5** |
| | **OR** | |
| | Complete the story. | |
| (i) | न्यायाधीशस्तस्य **मन्तव्यं** ज्ञात्वा क्रुद्धोऽभवत् । धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां **दातारः** दुर्लभाः एव । न्यायाधीशः अवदत् लक्षरूप्यकाणां दातारः कदाचिदन्येऽपि भवेयुः परं | **5** |

लक्षरूप्यकाणां **निराकर्तारः** मत्सदृशाः अन्ये विरला एव । अतः कृपया गच्छतु । न्यायस्थानं **मलिनं** मा कुरु । लज्जितः धनिकः धनस्यूतं **गृहीत्वा** ततः निर्गतः ।

**A.IV. (A) Rewrite the following sentences according to the order :** 5

(i) कदाचित् सः स्वसहाकारिभिः सह दूरवर्तिनं कंचन ग्रामं गतः ।

(ii) तत्पूर्वं कदापि स तत्र न गतवान् ।

(iii) ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् ।

(iv) कस्यश्चिदोषधेः अङ्गारसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमूच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत ।

(v) तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत ।

**OR**

**Answer *any five* question in Sanskrit :**

(i) वैद्यस्य पत्न्या **सात्त्विकमल्पं प्रातराशं** परिवेषितम् । 1

(ii) तपोदत्तेन शैशवे **विद्याध्ययनं** न कृतम् । 1

(iii) **धर्मात्** न अस्ति अपरः सुहृद् भवभृताम् । 1

(iv) कोलकत्तानगरे प्रदर्शनार्थं निर्मितस्य शिल्पस्य नाम **'शङ्खध्वनिः' इति अस्ति** । 1

(v) धनेशाः **महावृक्षकोटरे** वसन्ति । 1

(vi) **यः सङ्गणकविषये अन्तर्जालविषये च अनभिज्ञः** सः साक्षरः अपि निरक्षरः एव । 1

(vii) **'जयतु जवानो' इति उक्त्वा** कवयित्री योद्धारं नमति । 1

(viii) मुबारखेन्द्रः **एदलशाहभूपस्य** पुत्रः आसीत् । 1

**A.V. (A) Translate *any one* unseen passage / dialogue into English :**

(i) Some people ridicule memorization done orally (learning by heart) calling it 'rote of frogs'. But it is an experience that memorization done in childhood is helpful even during old age. All sciences stand, folding the hands (modestly), in front of him who memorizes a lot. On the contrary, one who does not do so (memorization), he searches many lexicons for insignificant (small) tasks. Picks references or asks some scholar. This is waste of time. Otherwise, he says something based on uncertain information that is not trustworthy. One who desires pearl, indeed needs to go to the bottom of the ocean. 5

(ii) The great scientist Sir Isaac Newton's kitten taught him the best lesson in science. When Newton got busy studying in his study, his 5

| | | |
|---|---|---|
| | cat would wish to enter the study at the same time. Hence, Newton made two holes in the door of the study. The bigger one for the cat and the smaller one for its kitten. But when the cat entered the study through the bigger hole, the young one also followed her. Newton forgot the simple principle of science that even a small animal can enter from a bigger hole. Even this happens at times. | |
| (iii) | प्रियंवदा – Alas ! Indeed the undesirable occurred. The absent-minded शकुन्तला offended some honorable one. (Looking ahead) This दुर्वासस् is a short-tempered sage. Having cursed her with unattainable solution, he left.<br>अनसूया – Who else can burn more than the fire ? Go, bow down at his feet and try to make him return; in the meanwhile I will keep water ready for the ablution.<br>प्रियंवदा – Sure. (Thus she retires) | **5** |
| **A.V.** | **(B) Translate *any one* group of verses into English :**<br>**Group I** | |
| (i) | In this world, there is no greater destruction for men than imprudent (careless) action. Prosperity abandons and misfortunes surround and imprudent (careless) person from all sides.<br>**Explanation :** An imprudent person overcome with pride is not liked. | **2** |
| (ii) | The roots are resorted to by snakes, peak by monkeys, branches by birds and flowers by the honey-bees; indeed there is not part of yours that is not resorted to by any being at all.<br>**Explanation :** This verse is an example of चन्दनान्योक्ति. | **2** |
| | **Group II** | |
| (i) | Even though a weapon is raised, a messenger doesn't speak otherwise (other than what he is asked to). They (messengers) indeed speak what is told and hence, they should not be killed by the king (protector of the earth). | **2** |

| | | |
|---|---|---|
| (ii) | Only that advice is the best advice, which is for protecting the gain of the past, making acquisitions in the future and for liberating one facing calamity. | **2** |
| **A.VI.** | **Answer in English : (*Any two*)** | |
| (i) | Colours are the integral part of any drawing. The expertise of a painter lies in the application of different colours. White, red, yellow, black and green are five important primary colours. Serval colours can be created by the combination of two-three colours. Among them black and white are very important for mixing. The painting looks very beautiful due to mixture of various colours but the painter has to be creative and imaginative. | **2** |
| (ii) | Sage मार्कंडेय has talked about various signs. There are different codes for people of different nature. Like, the eyebrows of a calm person should be like crescent moon whereas of a dancer, they should be in bow like shape. The images of deities should have various ornaments. Their faces should be pleased, charming whereas their attires should be of silk etc. The images of sages, seers should be with hair locks, bark. They should look weak but lustrous. | **2** |
| (iii) | डॉ. बाबासाहेब आंबेडकर was fond of Sanskrit language. He also knew the importance of Sanskrit which was the language of the Gods. Therefore he wanted Sanskrit to be a national language like Hindi. In order to do so, he first put forth the proposal in the executive meeting of 'Dalit Mahasangh'. He firmly believed that the root of Indian culture were in Sanskrit. Many Indian languages originate from Sanskrit. As it is revered by scholars and it deserves to be the national language. | **2** |
| (iv) | डॉ. बाबासाहेब आंबेडकर was fond of Sanskrit language. He also knew the importance of Sanskrit which was the language of the gods and wanted to give it the status of national language. Pertaining to this proposal, a discussion took place in the Parliament wherein पं. लक्ष्मीकान्त मैत्र asked him few doubts in Sanskrit to test his knowledge | **2** |

| | | |
|---|---|---|
| | of Sanskrit. डॉ. बाबासाहेब आंबेडकर replied in Sanskrit itself. All members were surprised to listen to that conversation. | |
| **A.VII.** | Make ***any five*** **sentences in Sanskrit by using indeclinables / governing cases :** | |
| (i) | **पुत्रेण साकं** जनकः ग्रामं गच्छति । | **1** |
| (ii) | **महिलानां कृते** शिक्षणम् आवश्यकम् । | **1** |
| (iii) | **शालां अभितः** क्रीडाङ्गणं वर्तते । | **1** |
| (iv) | **पाठशालायाः बहिः** विशालम् उद्यानं वर्तते । | **1** |
| (v) | जनकः **पुत्राय/ कन्यायै** उपहारं यच्छति । | **1** |
| (vi) | **श्रीगणेशः** मोदकेभ्यः **स्पृहयति / ते** । | **1** |
| (vii) | **श्रीगणेशाय** मोदकाः **रोचन्ते** । | **1** |
| (viii) | **जननीं प्रति** शिशुः धावति । | **1** |
| | **OR** | |
| | **Translate *any five* sentences in Sanskrit :** | |
| (i) | श्रीकृष्णस्य मस्तके / मूर्ध्नि मयूरपिच्छः राजते । | **1** |
| (ii) | सप्टेम्बरमासस्य पञ्चमे दिने शिक्षकदिनं सम्पद्यते / सभाजयति । | **1** |
| (iii) | रेल-आरक्षणम् अधुना / इदानीं सुलभं भवति । | **1** |
| (iv) | सत्पुरुषाः न्याय्यमार्गं न कदापि त्यजन्ति । | **1** |
| (v) | सेनाप्रमुखः व्यूहं रचयति । | **1** |
| (vi) | तव यशः नित्यं वर्धताम् । | **1** |
| (vii) | छिन्नः वृक्षः पुनः वर्धते / रोहति । | **1** |
| (viii) | (त्वं) तव भ्रमणध्वनिक्रमाङ्कं कथय । | **1** |
| **A.VIII.** | **Solve the following questions :** | |
| **(A)** | **Recognize *any three* of the following forms :** | |
| (i) | करिष्ये - Root कृ (8 UP) here AP<br>Second future tense<br>First person singular. | **1** |
| (ii) | नियुक्ता - Root नि + युज् (7 UP)<br>Past Passive Participle<br>Feminine gender<br>Nominative singular. | **1** |

| | | | |
|---|---|---|---|
| (iii) | पप्रच्छ - | Root प्रच्छ् - पृच्छ् (6 PP)<br>Perfect past tense<br>Third person singular. | **1** |
| (iv) | चेतसः - | चेतस् noun ending in स्<br>Neuter gender<br>Nominative, Accusative, Vocative plural<br>Ablative, Genitive singular. | **1** |
| (v) | उषित्वा - | Root वस् (1 PP)<br>Gerund त्वान्त अव्यय. | **1** |
| **(B)** | **Dissolve and name the compounds : (*Any three*)** | | |
| (i) | सुखदुःखयोः - | सुखं च दुःखं च, तयोः । - इतरेतर द्वन्द्व समास । | **1** |
| (ii) | पादपाः - | पादैः पिबन्ति इति । - उपपद तत्पुरुष समास । | **1** |
| (iii) | प्रसन्नचित्तः - | प्रसन्नं चित्तं यस्य सः । - बहुव्रीहि समास । | **1** |
| (iv) | सत्वरम् - | त्वरया सह । - अव्ययीभाव समास । | **1** |
| (v) | महाक्रान्तिः - | महती क्रान्तिः । - कर्मधारय समास । | **1** |
| **(C)** | **Dissolve sandhi as following : (*Any three*)** | | |
| (i) | स साक्षरोऽपि - | सः + साक्षरः + अपि । | **1** |
| (ii) | तच्छ्रुत्वा - | तत् + श्रुत्वा । | **1** |
| (iii) | स्थितेयम् - | स्थिता + इयम् । | **1** |
| (iv) | वंशोऽसौ - | वंशः + असौ । | **1** |
| (v) | बहुष्वमर्त्यैरद्यापि - | बहुषु + अमर्त्यैः + अद्य + अपि । | **1** |
| **(D)** | **Complete *any three* of the following sentences by choosing the suitable alternative given in the brackets :** | | **1** |
| (i) | **के** नाम रसाः ? | | **1** |
| (ii) | किं कृतं **त्वया** । | | **1** |
| (iii) | कारगिलमखे **स्वप्राणाः** तैः हुताः च सोल्लासम् । | | **1** |
| (iv) | नरेन्द्रस्य **हस्तात्** मूर्तिः पतिता । | | **1** |
| (v) | धनस्य हस्तान्तरणमनेन तन्त्रज्ञानेन कर्तुं शक्नुमः **वयम्** । | | |

| | | |
|---|---|---|
| **(E)** | **Do as directed : (*Any three*)** | |
| (i) | **सः धनिकः** सत्वरं **सेवकं प्रेषितवान्** । | **1** |
| (ii) | **यदि नष्टं कारणं तर्हि** कुतः कार्योत्पत्तिः ? | **1** |
| (iii) | **रात्रिः अयात्** । | **1** |
| (iv) | अध्ययनं कृत्वा सः स्वदेशं **प्रत्यागच्छत्** । | **1** |
| (v) | तं **व्यैक्षत** शक्रः निकटमागच्छत् **च** । / शक्रः तं **वैक्ष्यत** निकटमागच्छत् **च** । | **1** |

********